# Shridhara Ashtakam

# શ્રીધરાષ્ટકમ્

## Document Information

Text title : Shridhara Ashtakam 2

File name : shrIdharAShTakam2.itx

Category : deities_misc, gurudev, shrIdharasvAmI, aShTaka

Location : doc_deities_misc

Author : Prithviraj Bhalerao (suvrata)

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

Shridhara Ashtakam

# શ્રીધરાષ્ટકમ્

બ્રહ્મજ્યોતિર્વિલસિતમતિં સચ્ચિદાનન્દમૂર્તિં
 શાન્તં દાન્તં વિગલિતમલં કેવલં સ્વસ્વરૂપમ્ ।
સ્વાન્તર્સંજ્ઞાવિકસિતતપઃસ્થં સ્વયંશક્તિસિદ્ધં
 વન્દે વન્દે વિહસિતમુખં સદ્ગુરું શ્રીધરં તમ્ ॥ ૧॥

સ્વાત્મતૃપ્તં સહજસુખદં જ્ઞાનવિજ્ઞાન વિજ્ઞં
 શ્રદ્ધાલભ્યં પરમપદદં સ્વસ્તિદં સૌખ્યસિન્ધુમ્ ।
જ્ઞાનાકારં સુલભસરલં શુદ્ધતેજઃ સ્વરૂપં
 વન્દે વન્દે વિહસિતમુખં સદ્ગુરું શ્રીધરં તમ્ ॥ ૨॥

શિષ્યાનાં યો હરતિ હ્યખિલં સંસૃતિં સ્વસ્ય શક્ત્યા
 ભક્તાધારં પરહિતકરં શાન્તિદં સર્વદાદ્રમ્ ।
લીલાવેષં મધુરઙ્ગદિતં સત્ત્વરૂપં વિશોકં
 વન્દે વન્દે વિહસિતમુખં સદ્ગુરું શ્રીધરં તમ્ ॥ ૩॥

મોક્ષશ્રીદં હ્યભયવરદં યોગયુક્તં વિરક્તં
 શુદ્ધાનન્દં મુદિતવદનં ભક્તચિત્તપ્રમોદમ્ ।
શુભ્રજ્યોત્સ્નાશુભકરનિભં યસ્ય સ્વાનન્દધ્યાનં
 વન્દે વન્દે વિહાસિતમુખં સદ્ગુરું શ્રીધરં તમ્ ॥ ૪॥

વિશ્વાત્માનો વિનતશુભદઃ ધર્મમાર્ગાવગમ્યઃ
 નિત્યક્લિન્નો નિખિલકૃપયા હ્યાર્તદાસાનુકમ્પી ।
એકાન્તે યો નિજપદગતો યસ્ય મૌને પ્રતિષ્ઠા
 વન્દે વન્દે વિહસિતમુખં સદ્ગુરું શ્રીધરં તમ્ ॥ ૫॥

મેધાવી યો નિરવધિસુખો નિષ્કલોઙ્કારલક્ષ્યઃ
 સંવિદ્યુક્તો વિગતવિષયઃ સત્ત્વપન્થાનુગામી ।
સાક્ષાત્કારી મૃદુલવચનો વેદવેદાન્તવેદ્યઃ
 વન્દે વન્દે વિહસિતમુખં સદ્ગુરું શ્રીધરં તમ્ ॥ ૬॥

ભિક્ષાભાગ્યઃ પ્રણતશરણો વિશ્વકલ્યાણકારી
    રક્ષાકૃત્યો હિતકરવચઃ સર્વબાધાપહારી ।
શિક્ષાદાયી પ્રણવવિભવઃ તત્ત્વચિન્તાનુવાદી
    વન્દે વન્દે વિહસિતમુખં સદ્ગુરું શ્રીધરં તમ્ ॥ ૭॥

વિદ્યાયુક્તઃ સરસિજમુખો નિત્યશોઽધ્યાત્મવાદી
    આત્મદૃગ્યઃ સુનલનયનઃ સત્યસિદ્ધાન્તદર્શી ।
વિક્રાન્તો યઃ કમલચરણઃ શિષ્યચિત્તાનુચારી
    વન્દે વન્દે વિહસિતમુખં સદ્ગુરુ શ્રીધરં તમ્ ॥ ૮॥

શ્રીધરાષ્ટકં ભક્ત્યા યઃ પઠેચ્છૃણુયાદપિ ।
શ્રીગુરુઃ સ્વયં તસ્ય મોક્ષકારી ભવેદ્ધ્રુવમ્ ॥ ૯॥

(શ્રીધરસન્દેશઃ મે ૧૯૬૪)

ઇતિ શ્રી પૃથ્વીરાજ ભાલેરાવઃ અથવા સુવ્રત
    વિરચિતં શ્રીધરાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Paresh Panditrao

*Shridhara Ashtakam*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*